विधि। दक्षिणेनाथ गृह्णीयात् पितृतीर्थे समीपतः”। गोभिलः “गोत्रं स्वरान्तं सर्व्वत्र गोत्रस्याक्षय्यकर्म्मणि। गोत्रस्तु तर्पणे प्रोक्तः कर्त्ता एवं न मुह्यति। सर्व्वत्रैव पितः प्रोक्तः पिता तर्पणकर्म्मणि। पितुरक्षय्यकाले तु अक्षयां तृप्तिमिच्छता। शर्म्मन्नर्घ्यादिके कार्य्यं शर्म्मा तर्पणकर्म्मणि। शर्म्मणोऽक्षय्यकाले तु पितॄणां दत्तमक्षयम्”। कार्ष्णाजिनिः “नाभिमात्रे जले स्थित्वा चिन्तयेदूर्द्ध्वमानसः। आगच्छन्तु मे पितर इमं गृह्णन्त्वपोऽञ्जलिम्”। योगियाज्ञवल्क्यः “नामगोत्रस्वधाकारैस्तर्प्याः स्युरनुपूर्व्वशः”। तेन अमुकगोत्रः पिता अमुकदेवशर्म्मा तृप्यतामेतत्तिलोदकं तस्मै स्वधेति प्रयोगः सिध्यति। एवं मातामहादौ। एष चासम्बुद्धिप्रयोगो वाजसनेयीतरपरः। तेषान्तु सम्बुद्ध्यन्तता-माह ब्राह्मणसर्व्वस्वे जातूकर्ण्यः “प्रमीतपितृकस्तूशन्तस्त्वेत्यावाह्य नामगोत्रमुदाहृत्य यावता पितृकार्य्यमसावेतत्ते उदकमिति पितॄन् पितामहान् प्रपितामहान्। एकैकस्मै त्रींस्त्रीन्दद्यात्”। अत्र चासाविति नाम गृह्णातीति कात्यायनोक्तस्य नाम्नः ते इति युष्मत्प्रयोगात् सम्बुद्ध्यन्तता प्रतीयते तस्य सम्बुद्ध्यमानात्मवाचित्वात्। असम्बुद्धिप्रथमान्तत्वेऽनन्वयापत्तेः। ततश्चामुकगोत्र! पितरमुकदेवशर्म्मँस्तृप्यस्वैतत्ते तिलोदकं स्वधेति प्रयोगः सिध्यति। एवं मातामहानामपि। ततो मात्रादीनां षण्णां तर्पणानि। द्वादशानां मध्ये यो जीवति तं विहाय वृद्धप्रपितामहादीन् गृहीत्वा पूरयेत्। एवं प्रव्रजितिते पतिते च। ततो विमातृज्येष्ठभ्रातृपितृव्यमातुलादींस्तर्पयेत्। शङ्खः “बान्धवानां कृत्वा सुहृदां तर्पयेत्” सुहृदो मित्रादयः। मित्रायाप्यसवर्णाय जलं न देयम्। “सवर्णेभ्यो जलं देयं नान्यवर्णेभ्य एव च” इति याज्ञवल्कीयात्। भीष्मायासवर्णायापि भीष्माष्टम्यां तर्पणं कार्य्यम् “ब्राह्मणाद्यास्तु ये वर्णा दद्युर्भीष्माय नो जलम्। संवत्सरकृतं तेषां पुण्यं नश्यति सत्तम!” इत्यादि वचनात्। मन्त्रस्तु “वैयाघ्रपद्यगोत्राय इत्यादि। ब्राह्मणेनैतत् पितृतर्पणानन्तरं कार्य्यम् अन्येन पितृतर्पणात् पूर्व्वम्। अत्र वीजं वर्णज्यैष्ठ्यमिति हलायुधः। अपसव्येन दक्षिणामुखेन सतिलोदकेन सकृत् कर्त्तव्यम्। ततः कृताञ्जलिः” “भीष्मः शान्तनवो वीर” इत्यादि पठेत्। ततो येऽबान्धवा बान्धवा वा इत्यादिना एकाञ्जलिर्देयः। योगियाज्ञवल्क्यः “निष्पीडयति यः पूर्व्वं स्नानवस्त्रञ्च तर्पणात्। निराशाः पितरस्तस्य यान्ति देवाः सहर्षिभिः। तथा “अन्नप्रकरवत्तस्य अपसव्येन पीडनम्। अन्नप्रकरवत् श्राद्धोच्छिष्टसमीपान्नविकरणवत् तस्याधोवस्त्रस्य “स्नानशाट्यान्तु दातव्या स्वदस्तस्यो विशुद्धये” इति वशिष्ठवचने अधोवस्त्रस्य दुष्टस्यैव शुद्धये स्वदानं प्रतीयते। योगियाज्ञवल्क्यः “वस्त्रनिष्पीडितं तोयं स्नातस्योच्छिष्टभागिनः। भागधेयं श्रुतिः प्राह तस्मान्निष्पीडयेत् स्थले”। अत्र मन्त्रमाह गोभिलः “ये चास्माकं कुले जाता अपुत्रा गोत्रिणो मृताः। ते तृप्यन्तु मया दत्तं वस्त्रनिष्पीडनोदकम्”। अशक्तौ शङ्खः। “आब्रह्मस्तम्बपर्य्यन्तं जगत् तृप्यत्विति-क्रमात्। अञ्जलित्रितयं दद्यात् एतत् संक्षेपतर्पणम्”। “आब्रह्मस्तम्बपर्य्यन्तं देवर्षिपितृमानवाः। तृप्यन्तु सर्व्वे पितरो मातृमातामहादयः। अतीतकुलकोटीनां सप्तद्वीपनिवासिनाम्। आब्रह्मभुवनाल्लोकादिदमस्तु तिलोदकम्”।

जन्माष्टम्यां तर्पणस्य फलं यथा “तस्यां तिथौ वारिमात्रं पितॄणां यः प्रयच्छति। गयाश्राद्धं कृतं तेन शताब्दं नात्र संशयः” ब्रह्म०वै० श्रीकृष्णजन्मखण्डः। तर्पणञ्च देवर्षिपितृमनुष्याणां जलाञ्जलिदानेन तृप्तिसम्पादनम्। यथा “एवं स्नात्वा पितॄन् देवान् मनुष्यांस्तर्पयेन्नरः। नाभिमात्रे जले स्थित्वा चिन्तयेदूर्द्ध्वमानसः। आगच्छन्तु मे पितर इमं गृह्णन्त्वपोऽञ्जलिम्। त्रींस्त्रीञ्जलाञ्जलीन् दद्यादाकाशे दक्षिणे तथा। वसित्वा वसनं शुक्लं स्थले चास्तीर्णवर्हिषि। विधिज्ञास्तर्पणं कुर्य्युर्न पात्रे तु कदाचन। यदपां क्रूरमध्यं तु यदमेध्यन्तु किञ्चन। अशान्तं मलिनं यच्च तत्सर्व्वमपगच्छतु। गृहीत्वानेन मन्त्रेण तोयं सव्येन पाणिना। प्रक्षिपेद्दिशि नैरृत्यां रक्षोपहतये द्रुतम्। अनाह्निकन्तु यद्भुक्तं पापाद्यच्च प्रतिग्रहम्। दुष्कृतं यच्च मे किञ्चिद्वाङ्मनःकायकर्म्मभिः। पुनातु मे तदिन्द्रस्तु वरुणः स बृहस्पतिः। सविता च भगश्चैव मुनयः सनकादयः। आब्रह्मस्तम्बपर्य्यन्तं जगत् तृप्यत्विति ब्रुवन्। क्षिपेदपोऽञ्जलींस्त्रींस्तु कुर्व्वन् सङ्क्षेपतर्पणम्” गारुड़े २१५ अ०। तर्पणविशेषस्तु गारुड़े २१८ अ० वह्निपुराणे नित्याह्निकस्नानविधाननामाध्याये च द्रष्टव्यः। जीवत्पितृकस्य